संस्कृत

क्रं.१०

~~स्तोत्र~~ ~~इतिहास~~

पुराण

3875

वेदस्तुति

(भागवत)

७०|पृ. ५६

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1) श्रीगणेशायनमः श्रुतयऊचुः जयजयजह्यजामजितदोषगृभीतगुणां त्व
मसियदात्मनासमवरुद्धसमस्तभगः अगजगदोकसामखिलशक्त्यवबोध
कतेक्वचिदजयात्मनाचचरतोनुचरेन्निगमः ॥ १ बृहदुपलब्धमेतदवयंत्य
वशेषतयायतउदयास्तमयौविकृतेर्मृदिवाविकृतात् अतऋषयोदधुस्त्व
यिमनोवचनाचरितंकथमयथाभवंतिभुविदत्तपदानिनृणां २ इतितवसू
रयस्त्र्यधिपतेखिललोकमलक्षपणकथामृताब्धिमवगाह्यतपांसिजहुः कि
मुतपुनःस्वधामविधुताशयकालगुणाः परमभजंतियेपदमजस्रसुखानुभ
वं ३ दृतयइवश्वसंत्यसुभृतोयदितेनुविधामहदहमादयोंडमसृजन्यदनु
ग्रहतः पुरुषविधोन्वयोत्रचरमोन्नमयादिषुयः सदसतः परंत्वमथयदेष्व
वशेषमृतं ४ उदरमुपासतेयऋषिवर्त्मसुकूर्पदृशः परिसरपद्धतिंहृदयमा
रुणयोदहरं ७ ततउदगादनंततवधामशिरः परमंपुनरिहयत्समेत्यनप
तंतिकृतांतमुखे ५ स्वकृतविचित्रयोनिषुविशन्निवहेतुतयातरतमतश्चका

वेदस्तुतिः
१

स्यनलवत्स्वकृतानुकृतिः अथवितथास्वमूष्ववितथंतवधामसमंविरजाधि
योन्वयंत्यभिविपन्यवएकरसं ६ स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणंतव
पुरुषंवदंत्यखिलशक्तिधृतोंशकृतं इतिनृगतिंविविच्यकवयोनिगमा
वपनंभवतउपासतेंघ्रिमभवंभुविविश्वसिताः ७ दुरवगमात्मतत्वनि
गमायतवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः नपरिलष
तिकेचिदपवर्गमपीश्वरतेचरणसरोजहंसकुलसंगविसृष्टगृहाः ८
त्वदनुपथंकुलायमिदमात्मसुहृत्प्रियवच्चरतितथोन्मुखेत्वयिहितेप्रि
यआत्मनिच नबततरमंत्यहोअसदुपासनयात्महनोयदनुशयाभ्रमंत्युरु
भयेकुशरीरभृतः ९ निभृतमरुन्मनोक्षदृढयोगयुजोहृदियन्मुनयउपा १
सततदरयोपिययुःस्मरणात् स्त्रियउरगेंद्रभोगभुजदंडविषक्तधियो
वयमपितेसमाःसमदृशोंघ्रिसरोजसुधाः १० कइहनुवेदबतावरजन्म राम
लयोग्रसरंयतउदगादृषिर्यमनुदेवगणाउभये तर्हिनसन्नचासदुभयं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

नचकालजवःकिमपिनतत्रशास्त्रमवकृष्यशयीतयदा ११ जनिमसतःसतोमृ
तिमुतात्मनियेचभिदांविपणमृतंस्मरंत्युपदिशंतितआरुपितैः॥ त्रिगुणमयः
पुमानितिभिदायदबोधकृतात्वयिनततःपरत्रसभवेदवबोधरसे १२ ॥
सदिवमनस्त्रिवृत्त्वयिविभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्म
तयात्मविदः॥ नहिविकृतिंत्यजंतिकनकस्यतदात्मतयास्वकृतमनुप्रविष्ट
मिदमात्मतयावसितं ॥१३ तवपरियेचरंत्यखिलसत्वनिकेततयातउतपदा
क्रमंत्यविगणय्यशिरोनिरृतेः॥ परिवयसेपशूनिवगिराविबुधानपितांस्त्व
यिकृतसौहृदाःखलुपुनंतिनयेविमुखाः १४ त्वमकरणःस्वराडखिल
कारकशक्तिधरस्तवबलिमुद्वहंतिसमदंत्यजयानिमिषाः॥ वर्षभुजो
ऽखिलक्षितिपतेरिवविश्वसृजोविदधतियत्रयेत्वधिकृताभवतश्चकिताः॥
॥१५॥ स्थिरचरजातयःस्युरजयोत्थनिमित्तयुजोविहरउदीक्षयायदिपर
स्यविमुक्ततः॥ नहिपरमस्यकश्चिदपरोनपरश्चभवेद्वियतइवापदस्य

(3)

वेदस्तु॰

२

नवष्टन्यतुलांसधृतः १६ अपरिमिताध्रुवास्तनुभृतोयादिसर्वगतास्तर्हिनशास्य
तेतिनियमोध्रुवनेतरथा ॥ अजनिचयन्मयंतदविमुच्यनियंतृभवेत्सममनुजान
तांयदमतंमतदुष्टतया १७ नघटतउद्भवः प्रकृतिपूरुषयोरजयोरुभययुजाभ
वंत्यसुभृतोजलबुद्बुदवत् त्वयितइमेततोविविधनामगुणैः परमेसरितइवार्ण
वेमधुनिलिल्युरशेषरसाः १८ नृषुतवमाययाभ्रममभीषवगत्यभृशंत्वयिसु
धियोभवेदधतिभावमनुप्रभवं ॥ कथमनुवर्ततांभवभयंतवयद्भ्रुकुटिः सृजतिमु भु
हुस्त्रिनेमिरभवच्छरणेषुभयं १९ विजितहृषीकवायुभिरदांतमनस्तुरगंयइ
हयतंतियंतुमतिलोलमुपायखिदः व्यसनशतान्विताः समवहायगुरोश्चरणं
वणिजइवाजसंत्यकृतकर्णधराजलधौ २० स्वजनसुतात्मदारधनधाम
धरासुरथैस्त्वयिसतिकिंनृणांश्रयतआत्मनिसर्वरसे ॥ इतिसदजानतां हरिः
मिथुनतोरतयेचरतांसुखयतिकोन्विहस्वविहतेस्वनिरस्तभगः २१ भुवि २
पुरुपुण्यतीर्थसदनान्यृषयोविमदास्तउतभवत्पदांबुजहृदोघभिदं

(3A)

ध्रिजला: दधतिसकृन्मनस्त्वयियआत्मनिनित्यसुखेनपुनरुपासतेपुरुष
सारहरावसथान् २२ सतइदसुत्थितंसदितिचेन्नुतर्कहतंव्यभिचरति
क्वचिच्चमृषानतथोभययुक् व्यवहृतयेविकल्पइषितोंधपरंपरयाभ्र
मयतिभारतीतउरुवृत्तिभिरुक्थजडान् २३ नयदिदमग्रआसनभविष्य
दतोनिधनादनुमितमंतरात्वयिविभातिमृषैकरसे अतउपमीयतेद्रवि
णजातिविकल्पपथैर्वितथंमनोविलासमृतमित्यवयंत्यबुधा: २४ सय
दजयात्वजामनुशयीतगुणांश्चजुषन्भजतिसरूपतांतदनुमृत्युम
पेतभग:।।त्वमुतजहासितामहिरिवत्वचमात्तभगोमहसिमहीयसेष्ट
गुणितेपरिमेयभग: २५ यदिनसमुद्धरंतियतयोहृदिकामजटादुर
धिगमोसतांहृदिगतोस्मृतकंठमणि: असुतृपयोगिनामुभयतो

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

वेदस्तु

३

प्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः २६ त्वदवगमीन
वेत्तिभवदुत्थशुभाशुभयोर्गुणविगुणान्वयान्स्तर्हिनदेहभृतांचगिरः
अनुयुगमन्वहंसगुणगीतपरंपरयाश्रवणभृतोयतस्त्वमपवर्गगति
र्मनुजैः २७ द्युपतयएवतेनययुरंतमनंततयात्वमपियदंतरांडनि
चयाननुसावरणाः खइवरजांसिवांतिवयसासहयछ्रुतयस्त्वयिहि
फलंत्यतन्निरसनेनभवन्निधनाः २८ इतिश्रीभागवतेमहापुराणे
दशमस्कंदेउत्तरार्धेवेदस्तुतिः॥श्रीः॥ श्रीकृष्णकृष्णसखवृष्ण्यृषभाव
निध्रुग्राजन्यवंशदहनानपवर्गवीर्य॥गोविंदगोपद्विजसुरार्तिहराव
तारयोगेश्वराखिलगुरोभगवन्नमस्ते १ श्रृण्वंतिगायंतिगृणंत्यभी
क्ष्णशःस्मरंतिनंदंतितवेहितंजनाः॥तएवपश्यंत्यचिरेणतावकंभवप्र
वाहोपरमंपदांबुजं २

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com